CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

240

32

॥अथ वटसावित्रीव्रतारंभः॥

अग्नेवत्स

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥ अथवटसावित्रीपूजा॥ सुमुखश्चेत्यादि॰ममइहजन्म
निजन्मजन्मांतरेचअधीकलोभाग्यप्राप्त्यर्थंपुत्रपौत्रादिधनधान्यै श्वर्या
भिवृध्यर्थंभ्रातारस्यचिरायुष्प्राप्त्यर्थंवटसावित्रीदेवताप्रीत्यर्थंज्येष्ठशु
क्लपौर्णमासपर्वकालनिमित्तंश्रीपरमेश्वरप्रीत्यर्थंयथाशक्तियथाज्ञा
नेनयथामीलितोपचारैःपुराणोक्तमंत्रैश्चषोडशोपचारैःपूजनमहं
करिष्ये॥आसनादिकलशपर्यंतंकरिष्ये॥पृथिवीतिमं॰॥पृथिवीत्व
या॰॥कलशस्यमुखेविष्णु॰॥५॥वरुणायनमः॥इतिकलसपूजार्थंअक्ष

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तां समर्पयामि ॥ अपवित्रः पवि० इत्याज्यं ॥ अथ ध्यानं ॥ श्रीम
तेवटवृक्षायनमो धृजैरिरूपि० ॥ पतिव्रतेमहाभागे सत्ववाक्यानिरंजि
नेवटसावित्रीसांगायसपरिवारायनमः ॥ ध्यायध्यामार्थेअस० ध्यानं ॥
पतिव्रतेमहाभागे जातेशुचिव्रतेसते ॥ अवैधव्यंचसौभाग्यंदेहिपुत्रा
न्महाव्रते ॥ आवाहनं ॥ ॐकाररूपिणीदेवी वीणापुस्तकधारिणी ॥
वेदमातेनमस्तुभ्यंअवैधव्यंदधातुमे ॥ सावित्र्यैतेनमः ॥ दोप्रसवि
त्रेवज्राङ्गुनी ॥ करिकोमलपत्राक्षेयभूतधात्रेतथोदरे ॥ अर्घ्यं गायत्र्यैतेनमः ॥ कंठे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ब्रह्माप्येतेनमः शिरः पादौ धात्रेनमस्तुभ्यं स्रष्ट्रेशायवेनमः आचमनीयं कल्पि
सर्वेजगद्धात्री उरसंवेधसिणी कंदंसत्यस्यपत्न्यो शिरस्तेसर्वधारिणी पंचा
मृतस्नानं गव्येपयो पंचामृतस्नानं गंगासरस्वतीरेवा स्नानं अभिषेकः
विश्वेश्वरविरूपाक्षविश्वरूप त्वयासर्वंजगत्सर्वंसदेवासुरमानुषं सत्यश्चत
सुरश्रेष्ठपद्मयोतेनमोस्तुतेः वस्त्रं पतिव्रतेमहाभागेब्रह्मजातेशुचिस्मिते द
ढव्रतेसदानुष्टेभर्तृश्रियवादिनी उपवस्त्रं श्रीखंडंगंधंवाहरिद्राकुंकुमंक
ज्जलं कंठसूत्रंसिंधुरंशोडपत्रंसकज्जलाभरणार्थं पुष्पंसमर्पयामि माल्यादी

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नीतिपुष्पं ॥ वनस्पतिरितिधूपं ॥ आज्यंचेतिदीपं ॥ अन्नंचतुर्विधमितिनैवेद्यं ॥ पु
गीफलमितिताम्बूलं ॥ हिरण्यगर्भेतिदक्षिणा ॥ इदंफलमितिफलं ॥ यानिकानि
चिन्मदक्षिणा ॥ इतिसावित्रीप्रजामंत्रः ॥ सत्यवत्सजनंब्रह्मप्रजामंत्रेणवैतथा ॥
यमोवैवस्वतोदेवोदेवोमहामहिषवाहनः ॥ पाशहस्तोमहाभीमतस्मैनित्यं
नमोनमः ॥ यमप्रजामंत्रः ॥ नारदायनमस्तुभ्यंनित्यवीणाधरायते ॥ मुनी
ड्रायसुरेशेषुपूजयिताननोनमः ॥ नारदप्रजामंत्रः ॥ श्रीमतेवटरक्षायनमो
ब्रह्मरूपिणे ॥ वैधव्यादिविनाशायसौभाग्यफलदायिने ॥ वटप्रजामंत्रः ॥ ॐ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कारस्वरूपिणी देवी विष्णोः पुत्रस्वरूपिणी ॥ अवैधव्यं च सौभाग्यं गृहाण गृह्यं ॥ त्वं कर
मिश्रिभूता नारायणस्य शुभविवर्धकः ॥ वैवस्वतगृहाण गृह्यं ॥ यमाय गृह्यमंत्रः ॥ नारायण
नमस्कृत्य सुरेशाद्यभिवंदिता ॥ गृहाण गृह्यं नमस्कृत्य अवैधव्यं प्रयच्छ मे ॥ नारा
यणमंत्रः ॥ वरुणस्य नमस्कृत्य सत्यमेन प्रसाद्य ॥ नमस्ते रुद्ररूपाय गृहाण गृह्यं
प्रयच्छ मे ॥ वरुणगृह्यमंत्रः ॥ अग्निमंत्रः ॥ सावित्री त्वं सावित्री ब्रह्मणः प्रिय वादि
नी ॥ तेन सत्येन मां पाहि दुःखसंसारसागरात् ॥ त्वं गौरी त्वं धात्री त्वं लक्ष्मी त्वं प्रभावं
दमंत्रः ॥ सौभाग्यं च जनार्दनि देहि त्वं मम सुव्रते ॥ मन्मया ऽकृतं सर्वकृतं जन्म

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शनैरपि भस्मीभवतु तत्सर्वं अवैधव्यं प्रयच्छ मे सावित्री प्रार्थना अवियोगेन
यादेवसाविच्यासहतेसदा अवैधव्यं वधास्कंभूयाज्जन्मनिजन्मनि जल
नार्थं कुलद्वयं यथादेवत्वया संस्थ कृतं तथा सर्वं समाप्यस्तु नित्यहवि
स्तर्पणात् सत्यसेप्रतिमाणंरजिनीघोरयोगिनी सर्वान्कामान्प्रयच्छ तंवै
धव्यं व्याधिनाशनी सावित्री प्रार्थना मंत्रः अवियोगेत्वया देवसाविच्यास
हतेसदा अवैधव्यंप्रयच्छामि ममजन्मनिजन्मनि सत्यसेनममंत्रः कर्मसा
क्षीजन्यसर्वंद्यप्रसीदमे सावित्रीमिवमांधर्मवैधव्यंरहितंकुरु यमया

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

र्यनामंत्रः ॥ वटसिंचामितेमूलंपानीयैरवसृतोभवैः भर्तुर्मंजीवनार्थायजवैध
व्यंप्रयच्छमे ॥ वटप्रार्थनामंत्रः ॥ वंदनंवस्त्रकुंभैर्भूषदीपनैवेदनै ॥ नानाविधैः
ल्लवर्णोल्लसितासिपतिव्रते ॥ सत्यसेनपतिं ॥ आप्यभवंतुचषशतायुषो ॥ मा
सनिरीतिम्वेषंसमरेचितथाकुरु ॥ त्रिसंधंदेवलोकानांसृजनीयासुसुव्रते
मयाहूतेगृहाणेमांसृजादेवीनमोस्तुते ॥ सृजापर्णमंत्रः ॥ आवाहनंनजानामि ॥ मंत्रहीनंक्रियाहीनं ॥ अन्यथाशरणंनास्ति ॥ गतंदुःखंगतंपापं ॥ त्व
मेवमातापिताच ॥ करचरणकृतंवाकायजंक ॥ विहितमवि ॥ ज्ञेषेऽसि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कृष्णपक्षेपौर्णमांशिदिनव्रतं ॥ इच्छितंतंचसौभाग्यंव्रतस्याचरितंत्वया ॥ इति
वरसावित्री एजासमाप्तोयं ॥ शुभंभवतु अथकथा ॥ सनत्कुमारउ० ॥ कुलस्त्री
णांव्रतंदेवमहाभाग्यंतथैवच ॥ अवैधव्यकरंस्त्रीणांपुत्रपौत्रप्रदायकं ॥ ईश्वरउ०
॥ आसीन्महीपोधर्मात्माज्ञानीपरमधार्मिकः ॥ नाम्नाचाश्वपतिर्वीरोवेदवे
दांगपारगः ॥ अनपत्योमहाबाहुःसर्वैश्वर्यसमन्वितः ॥ सपत्नीकस्तपस्तेप
मारुधयतेनृपः ॥ सावित्रीचप्रसावित्रीजपन्नास्तेमहामनाः ॥ जुहोतिचैवसा
वित्रीभक्त्यापरमयायुतः ॥ ततस्तुष्टातुसादेवीसावित्रीह्निजन्मनः ॥ सावि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यहवती देवी तस्य दर्शनमागता भूर्भुवः स्वरिषत्येवामासमूचुकमंडलुःतांतु दृष्ट्वा जगदुर्यामावित्री वानरोत्तमः प्राणपत्न्यनृपोभक्त्या यहहेनांतरात्मनातं दृष्ट्वापतिंभूमौतुष्टादेवीजगादहतुष्टाहंतवराजेंद्रवरंवरयसुव्रत एवमुक्तस्तयोराजाप्रसन्नातामुवाचह अनपत्योह्यहंदेविपुत्रमिच्छामिशोभनं नान्यंवरंमेमासावित्रिपुत्रमेवंजगत्पतेअन्यद्दत्तिसमंमेस्तिनोयज्ञापिदुर्लभं प्रसादन्नवरेवेहितत्सर्वंविद्यतेगृहे एवमुक्तातुसादेवीप्रत्युवाचनराधिपं पुत्रस्तेनास्तिराजेंद्रकन्यैकातेभविष्यते कुलद्वयंतुसारानन्तुद्धरिष्यति

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इत्युक्तांमुनिश्रेष्ठराजानंब्रह्मणःप्रिया अंतर्हितंगतादेवीसंतुष्टासोमहीपतिः
ततःकतिपयाहेस्यतस्यराज्ञीमहीभुजः ससत्वासमजायेतहर्षेकालेसुखावह
हः सावित्र्यातुषयादत्तासावित्र्याजनयातथा सावित्रीतेनवरदातस्यनामब
भूवहराजतेदेवगर्भरूपाकन्याकमललोचना वृहद्देशामुनिश्रेष्ठंदृष्ट्वेवंवच
चरे सावित्रीब्रह्मणोवैसाश्रीरिवायतलोचना तांदृष्ट्वाहेमगर्भाभांराजाचिंता
मुपेयिवान् अयाच्यमानाचवरेरूपेणाप्रतिमाभुवि तस्यरूपेणतेसर्वेसन्निरु
द्धामहीभुजः ततःसराजावाहूयउवाचकमलेक्षणा पुत्रिप्रदानकालस्तेनव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यावंतिकेचनस्वयंवरंचरचंतेपतिंगुणसमन्वितं मनःप्रह्लादनरकंश्रीलेना
भिजलेनच इत्युक्तातांसराजेंद्रोवृद्धामान्यैःसहैवतां वस्त्रालंकारसहितां
धनरत्नैःसमन्वितां विसृज्यचक्षणंतत्रयावतिस्थितिभूमिपः तावत्तत्रसमाग
च्छन्नारदोभगवान्मुनिः संदृश्यचनतोराजा अर्घ्यपाद्येनतंमुनिं आसनेच
मुखासीनंप्रणितस्तेनभूमिजा प्रजयित्वामुनिंराजाप्रोवाचेदंद्विजोत्तमं
पावितोहंत्वयाविप्रदर्शनेनाद्यनारद यावरेवंवरेद्राजातावत्साकमलेक्ष
णा आश्रमारागतारेवीवृद्धामान्यैसमन्वितां अभिवाद्यमितुःपादौववं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

देसासुनिसत्तमः ॥ नारदेनतुतुष्टात्मादृष्ट्वाप्रोवाचभूमिपं ॥ कन्येयंदेवगर्भाभा कि
मर्थंनप्रयच्छसि ॥ वराय त्वंमहाबाहोवरयोग्याहिसुंदरी ॥ एवमुक्तस्तदातेन
मुनिनानृपसत्तमः ॥ उवाचतंमुनिंवाक्यमनेनार्थेनप्रेषिता ॥ आगतेयंवि
शालाक्षीमयासंप्रेषितासती ॥ अनयाचरतोभर्त्तीरक्षत्वंमुनिसत्तम ॥ सा
दृष्ट्वातेनमुनिनातंप्रोवाचदृष्टभामिनी ॥ आश्रमेमत्पतिर्नामधृमत्सेनसु
तोमुने ॥ भर्त्रेतेनमयाविप्रवनेतोरक्षणंकृतं ॥ नारदउवा ॥ कष्टंकृतम
हाराजनकुहित्रातवसुव्रत ॥ अजानंत्यावरोभर्त्तागुणवानितिविश्रुतः ॥ स

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

व० क० ७

त्यंवरत्वस्यपितासत्यंमातप्रभावते॥स्वयंसत्यंप्रभाषेतसत्यवानितितन्म
तः॥तथाचाश्वाःप्रियास्तस्यअश्वैःक्रीडतिसन्ततं॥चित्रेचित्रलिखत्स्थश्चि
त्राश्वस्तेनोच्यते॥रूपवान्गुणवांश्चैवसर्वशास्त्रविशारदः॥नतस्यसदृशोलो
केविद्यतेचेहमानवः॥सर्वैःगुणैःस्वयंपूर्णोरत्नैरिवमहार्णवः॥एकोदोषोमहा
नासीद्गुणानांहरतिप्रभुः॥संवत्सरेणसौम्यायुर्हित्वागंकरिष्यति॥अथप
तिरु०॥अन्यंवरयभद्रंतेवरंसावित्रिगम्यतां॥विवाहस्यतुकालोयंवर्त्ततेशुभलो
चने॥सावित्युवाच॥नान्यमिच्छाम्यहंतातमनसापिवरंप्रभो॥योमयावरतोभ

ए म ७

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नीसमेनान्योभविष्यति विचिंत्यमनसासर्ववाचंपश्चात्समुच्चरेत् क्रियतेच
ननःपश्चात्सुभंवायदिवाःसुभं तस्मान्मनःपूर्वंसंचकथंवान्यंवृणोम्यहं
सकृज्जल्पंतिराजानःसकृज्जल्पंतिपंडिताः सकृत्कन्याप्रदीयंतेत्रीण्येता
निसकृत्सकृत्पतिंमत्वानमेबुद्धिर्वचलेतंकथंचन सगुणोनिर्गुणोवा
पिर्मूखःपंडितएवचा दीर्घायुरथवाल्पायुःसर्वेभर्तासमप्रभो नान्यंवृ
णोमिभर्तारंयदिवास्याच्छचीपतिः इतिमत्वामयातातयत्कर्तव्यंसुखं
नच नारदउ० स्त्रिरा बुद्धिश्वरा जेंद्रसावित्र्यासत्यवान्प्रति वरयस्वेति

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वाहायभक्षीसहकुरुक्षिष ईश्वरउ॥ निश्चितंतुमतिंज्ञात्वास्थिरांबुद्धिंश्रुति
श्रुतां सावित्र्याश्चमहाराजःप्रतस्थेसौवनंप्रति॥ गत्वातुवनंराजाद्युमत्से
नस्यसन्निधौ॥ स्वल्पानुगोमहाराजोदृष्ट्वामार्त्येःसमन्वितः॥ नारदस्तुततः
खेचैतत्रैवांतरधीयत॥ सगत्वाराजशार्दूलोद्युमत्सेनंददर्शह॥ दृष्ट्वांध
श्वराजासोदृक्षमूलमुपाश्रितः॥ तस्याश्वपतिराजासोपादौजग्राहवीर्य्य
वान्॥ स्वनामचमुहुर्य्यन्तस्थौतस्यसमीपतः॥ उवाचराजतंभूपंकिमाग
मनकारणं॥ पूजयित्वार्घ्यदानेनवन्यमूलफलैश्चसः॥ ततःपप्रच्छकुशलं

Kashi Maharani Collection, Ramnagar Fort, Varanasi.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सराजामुनिसत्तम ॥ अश्वपतिरुवाच ॥ कुलेऽहंदशनेनाद्यतवराजन्समाद्यवै
दृहितानामसाविंशतवपुत्रमभीप्सति ॥ भर्त्तारंराजशार्दूलशाल्वेत्रियम
निंदितां ॥ ममेदंकांक्षितंपूर्वंभर्त्तारमनयाविभो ॥ आवयोश्चैवसंबंधोभव
त्वद्यममेप्सितः ॥ द्युमत्सेनउ० ॥ दृष्ट्वाधश्वराजेंद्रफलमूलाशनोनृप ॥ रा
ज्याच्युतश्चमेपुत्रोवन्येनाद्यवसीवति ॥ साकथंसहनेदुःखंदुहितातवका
ननेअनभिज्ञाचदुःखानामित्याहराजिकांक्षते ॥ अश्वपतिरुवाच ॥ अन
याचहतोभर्त्ताजानेत्वाराजसत्तम ॥ अनेनसहवासस्तेतवपुत्रेणमानद ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वर्गीनुत्योमहाराजभविष्यतिनसंशयः एवमुक्तस्तदानेनराज्ञाराजर्षि
सत्तमः तथेतिसप्रतिज्ञायचकारेहाहसुव्रतं कृत्वाविवाहंराजेंद्रःसप्र
ज्यविधिधैर्यनैः अभिवाद्यसुमत्तेनंजगामनगरंप्रति सावित्रीनृपतिल
ब्ध्वाहृदिप्राप्यशचीयथा सत्यवानपिब्रह्मर्षेतयापत्न्याःभिनंदितः क्री
डतेतद्नोद्देशेपोलोम्यामघवानिका नारदस्यवतद्वाक्यंहृदयेनमनस्वि
नीवहेतानियमंचक्रेव्रतस्यास्यवभामिनी गणयंतीदिनान्येवनलेभो
तोषमुत्तमं ज्ञात्वातद्दिवसंविप्रमृत्युर्मरणकारणं व्रतंत्रिरात्रमुद्दिश्यदि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वाराङ्गेस्थिरमभवत् ततस्त्विराङ्गेनिर्वर्त्यसंतर्प्यपितॄदेवताः॥ अत्रांतरेच
नियमंत्रिदिनस्थमनस्विनी॥ अस्मिन्दिनेचमर्त्यांतरासत्यवतासुते
कुमारंसंपरिष्वज्यपीठकंचैवसुव्रते॥ तंप्रस्थितंवनायैवसाविप्रीवाक्य
मब्रवीत्॥ नगंतव्यंवनंत्वयसमवाक्येनमानद॥ अथवागम्यतेसाधोम
यासहवनंत्वया॥ संवत्सरंचसंपूर्णमाश्रमेस्मिन्मयासमं॥ तद्वनंदृष्टसिला
मित्रसादंकुरुमेप्रभो॥ सत्यवान्तेवाच॥ नाहंखलेतेः शृणोणीच्छुंचपि
तरोमम॥ ताभ्यामस्थापितागच्छमयासहसुचिस्मिते॥ एवमुक्तातदा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तेनभक्त्रीमाकमलेक्षणा सुश्रूश्वशुरयोः पादावभिवंद्येदमब्रवीत् वनंद्रष्टुमभि
च्छेयं आज्ञामह्यंप्रदीयतां उवाचवचनंमाधीवरमेकमयछथ भक्त्रीसहवनंगंतु
मेतत्वरयतेमनः तस्यास्तद्वचनंश्रुत्वाद्युमत्सेनोऽब्रवीदिदं वनेक्लेशस्त्वया भ
द्रेपारणंकुरुसुव्रते पारणंतेभीरुतोगंतुंचाथत्वमर्हसि सावित्युवाचनि
यमश्चकृतोऽस्माकंरात्रौवंद्योदयेसति जातेमयाप्रकर्त्तव्यंभोजनेतातमेश्रु
वनरर्शनकामोऽस्मिभक्त्रीसहमाद्यवै नमेतत्रभवेत्क्लान्तिभक्त्रीसहनराधि
प इत्युक्त्वास्तुतदाराजाद्युमत्सेनोमहीपतिः यत्नेऽभिलषितंपुत्रीतकुरुष्व

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ज्यात्तपसःफलं॥व्रतस्यैवतुमाहात्म्यंदृष्टमेतन्मयाधुना॥ईश्वरउ०॥एवंतुवदत
स्तस्यंतदासत्यवतःप्रभो॥घोराःसमागतास्तस्यआचख्युर्नृपतिप्रति॥येनराज्यं
बलाद्राजन्हृतंक्रूरेणमंत्रिणा॥अस्माभ्येनहतःसोपिइतिघोराःसमागताः॥घो
राऊचुः॥उत्तिष्ठराजशार्दूलस्वराज्यंपालयप्रभो॥अभिषिंचस्वराजेंद्रपुरेमंत्रि
पुरोहितैः॥ईश्वरउ०॥समुत्थाराजशार्दूलःस्वपुरंजनसंवृतः॥पित्रेतामहरा
ज्यंसंप्राप्तंचमहात्मना॥सावित्रीसत्यवाश्चैवपरंहृदमवापतुः॥जनयामा
सपुत्राणांश्चतेवैवाहशालिनां॥व्रतस्यैवतुमहात्म्यान्मयाःपितुरजायत॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पुत्राणांचशतंब्रह्मन्प्रसन्नाच्यसाक्षथा एततेकथितंसर्वंव्रतमाहात्म्यमुत्त
मंक्षीणायुर्जायतोभर्त्रीव्रतस्यास्यप्रभावतः कर्त्तव्यंसर्वनारीणामवैधव्यफ
लप्रदंसनत्कुमारउ॰ विधानंब्रूहिदेवेशव्रतस्यास्यचयंबक॰ कियतेविधि
नाकेनस्त्रीणांपुरनिषूदन ईश्वरउ॰ वर्षंकृत्वियमंकृत्वाचतुर्थेदिवसेशु
भेचंद्रायार्घंप्रदायाब्दंपूजयित्वासुवासिनी॰ साध्वीचप्रसाध्वीगंधधूप
निवेदनैः मिथुनानियथाशक्त्याभोजयित्वायथासुखं भोक्षेहंतुजगद्धा
त्रिनिर्विघ्नंकुरुमेसुभे दिनंप्रतिदिनंविप्रकुर्य्याच्चक्रोधसेवनं कृत्वावरान्म

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

येयात्रेवालुकास्थलमेवचसप्तधान्यमृतंपात्रंप्रस्थैकेनद्विजोत्तम कारयेत्सुनिरा
ईलवस्त्रयुग्मेनवेष्टयेत् तस्योपरिन्यसेद्देवीसावित्रीन्तुसुशोभनां सावित्रीसम
बोध्येवकार्यारोप्यमयासुधौ पीठकंचतुष्टारंचसुशोभनं द्विजफलैः का
लोदुंबरैर्देवीपूजयेद्धूपणः प्रियां हरिद्रारंजितैश्चैवकंकणैस्त्रैः समर्च्चयेत् सर्वा
नांकंकणसूत्राणिविन्यसेत्तिपादयेत् पक्कान्नानिचदेयानिनित्यमेवद्विजोत्त
म माहात्म्यंचैवसावित्र्याः श्रोतव्यंसुनिसत्तम पुराणश्रवणंकार्यसतीनां
चरितंविभो पूजयेन्नित्यमेवैहमंत्रेणानेनसुव्रत सावित्रीचप्रसावित्रीस

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तनंबलणःप्रियाऽन्यसेऽयसेदेविहिजैर्मुनिगणैःसदा त्रिसंध्यंदेवभूतानां
वंदितात्वंजगन्मये मयादत्ताचपूजेयंप्रतिगृह्णनमोस्तुते नमःसावित्र्यैपा
दौतुश्रुतिपूर्वोक्तपूजनं सावित्रीचप्रसावित्रीहिधाभूतासिशोभने जगत्त्रय
स्थितादेवित्रिसंध्याचतथानद्ये त्रित्वेदेविलोकेचत्रेतागोस्त्वंमहेश्वरी
व्यापितसकलंलोकं अतोमांपाहिसर्वदा रूपेदेहियशोदेहिसौभाग्यंदेहि
मेशुभे पुत्रान्देहिधनंदेहिसर्वजन्मसुसर्वदा यथातेनविनोगस्त्वंभवोस
हसुरेश्वरि तथामेस्तुमहाभागकृतंजन्मजन्मनि एवंसंपूजयेद्देवंक

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मलासनसंस्थितं एवंदिनत्रयंनीलावतुर्थेहनिसत्तम मिथुनान्वितसंभोग्यो
ऽहोवद्विजोत्तम हृतयेहस्वदानैश्चभूषणैश्चद्विजोत्तम अर्चयित्वातथाचार्य्यं
सपत्नीकंसुसंमतं तस्मैसंकल्पितंसर्वंहेमसावित्रीसंयुतं मनेणानेनदातव्यं
द्विजमुख्यायसुव्रत सावित्रीकल्पिविद्वेषजिपत्यतथासुने सावित्रीजग
न्मातासावित्रीजगतःपिता मयादत्ताचसावित्रीब्राह्मणःप्रतिगृह्यतां
अवैधव्यंचमेनित्यंयावज्जन्मनिजन्मनि मृताचवसतेलोकेब्रह्मणःपति
नासह तत्रैवचचिरंकालंसुखंभोगानवुत्तमान् अनेनैवविधानेनक

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

र्नेयं व्रतमुत्तमं सर्वान्मनोरथान्प्राप्य अन्ते रुद्रो पजायते इति स्कंदे सावित्री व्रतं संपूर्णम् शुभंभवतु

Kashi Maharani Collection, Ramnagar Fort, Varanasi